M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref. / Ser. 947

Title Daśāhika Vidhi

997

| | | | |
|---|---|---|---|
| | | Daśahara Vidhi | Title |
| | | | Author |
| | | | Editor |
| | | | Year, Vols. |
| | | | Publisher |
| 997 | | | Remarks |

श्रीः॥ अथज्येष्ठशुक्लनवम्यांदशाहाराख्यंस्नानदानादिकव्रतं॥ स्कांदे॥ ज्येष्ठस्यशुक्लनवमीसंवत्सरमुखास्मृता॥ तस्यांस्नानंप्रकुर्वीतदानंचैवविशेषतः॥
याकाचित्सरितंप्राप्यप्रदद्याच्चतिलोदकं॥ मुच्यतेदशभिःपापैर्विष्णुलोकंसगच्छति॥ ज्येष्ठशुक्लदशम्यांतुभवेत्सौम्यदिनंयदि॥ ज्ञेयाहस्तर्क्षसंयुक्ता
सर्वपापहरातिथिः॥ दशमीशुक्लपक्षस्यज्येष्ठमासेबुधेहनि॥ अवतीर्णायतःस्वर्गाद्धस्तर्क्षेचसरिद्वरा॥ हरतेदशपापानितस्माद्दशहरास्मृता॥ ज्येष्ठमा
सिसितेपक्षेदशम्यांबुधहस्तयोः॥ गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ॥ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते॥ तस्यांदशम्यामेतच्चस्तोत्रंगंगा
जलेस्थितः। पठेद्दशवारंस्यात्सर्वपापैःप्रमुच्यते॥ सोपितत्फलमाप्नोतिगंगासंपूज्ययत्नतः॥ ॥इतिदशाहराविधिः॥ ॥
एवंश्रीगंगायाः ध्यानार्चनं विधायपश्चाज्जलमध्येस्थित्वा॥ ज्येष्ठमासेसितेपक्षेप्रतिपदारभ्यदशमीपर्यंतंप्रतिपदादिनमेकोत्तरवृध्यादिसर्वपापक्ष
यार्थंदशहरास्तोत्रपठणमहंकरिष्ये॥